**दुर्मुख** त्रि० दुष्टं मुखं तद्व्यापारो वाक्यं यस्य प्रा० ब०। १अश्वे हेमच०। २वानरभेदे ३राक्षसभेदे "रक्षःपतिस्तद्बलौघनिकुम्भकुम्भधूम्राक्षदुर्मुखसुरान्तनरान्तकादीन्" भाग० ९।१०।१८ ४नागभेदे मेदि०। "नागश्रेष्ठो दुर्मुखश्चाम्बरीषः स्वयं राजा वरुणश्चापि राजन्" भा०मौस०४अ० ५महिषासुरसेनानीभेदे "दुर्द्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम्" देवीमा० ६शिवे "नन्दिमुखो भीममुखः सुमुखो दुर्मुखोऽमुखः" भा०शा०२८६अ० शिवनामोक्तौ। ७धृतराष्ट्रपुत्रभेदे "दुःसहो दुःशलश्चैव दुर्मुखश्च तथा परः" भा०आ०६७अ०। ८नृपभेदे। "संग्रामजिद्दुर्मुखश्च उग्रसेनश्च वीर्यवान्" भा०स०४अ० युधिष्ठिरसभागतनृपोक्तौ ९यक्षभेदे ब्रह्मपु०। १०अप्रियवादिनि त्रि०। ११रामस्यान्तःपुरचारिणि चरभेदे "शुद्धान्तचारी दुर्मुखः स मया पौरजानपदानपसर्पितुं प्रयुक्तः" उत्तररामच०। १२उत्तरद्वारगृहे ६०वर्षमध्ये १३वर्षभेदे "तृणधान्यक्षयो देवि! सर्वशस्यमहार्घता। व्यवहाराश्च नश्यन्ति दुर्मुखे दुर्मुखाः प्रजाः" ज्यो०त०भवि०पु०

**दुर्मुहूर्त्त** अ० निन्दितो मुहूर्तः प्रा०स०। अप्रशस्ते मुहूर्ते "नक्षत्रेष्वासुरेष्वन्ये दुस्तिथौ दुर्मुहूर्तजाः। संपतन्त्यासुरीं योनिं यज्ञप्रसववर्जिताः" भा०शा०१८०अ०

**दुर्मूल्य** त्रि० दुःस्थितं मूल्यं प्रा०स०। १दुःस्थिते मूल्ये २महार्घे यस्य यन्मूल्यं क्लृप्तं तत आधिक्ये मूल्यस्य दुःस्थितत्वमिति बोध्यम् प्रा०ब०। ३तद्युक्ते त्रि०

**दुर्मेधस्** त्रि०निन्दिता मेधाऽस्य असिच् समा०। १निन्दितमतौ विवेकासमर्थे २धारणवर्जितबुद्धिके "न किञ्चिदुक्त्वा दुर्मेधास्तस्थौ किञ्चिदवाङ्मुखः" भा०व० १०अ० "प्रत्याख्यातोऽपि दुर्मेधाः" २८१अ०। आर्षे तु समासान्तविधेरनित्यत्वात् क्वचिन्नासिच् समा०। "तएव वेदा दुर्मेधैर्धार्यन्ते पुरुषैर्यथा" भाग० १।४।२५ "अश्रद्दधानान् निःसत्त्वान् दुर्मेधान् ह्रसितायुषः" भाग०१।४।१८

**दुर्मोह** पु० निन्दितं मुह्यत्यनेन मुह–करणे घञ्। १काकतुण्ड्यां राजनि०। २काकादन्यां स्त्री शब्दार्थचि०।

**दुर्य** पु० दुरं द्वारं याति या–क दुरि द्वारे भवः यत् वा। १गृहे "देवी दुर्ये आयुर्मी" शत०ब्रा० ३।५।३।१८ "त्वं गोष्ठ मावदतं देवी! दुर्ये" यजु०५।१७। दुर्यशब्दो गृहवाची "दुर्या वै गृहाः" इति श्रुतेः वेददी०। द्वारे भवे२यूपे च। "निरेके पज्रेषु स्तोमो दुर्यो न यूपः" ऋ०१।५१।१४

**दुर्यशस्** न० निन्दितं यशः प्रा०स०। विरोधिलक्षणया १अकीर्त्तौ "त्वद्यशस्सूचीसचिवः स कामिनोर्मनोभवः सीव्यति दुर्यशःपटौ" नैष०। दुःस्थितं यशोऽस्य प्रा०ब०। २दुष्टयशस्के त्रि०

**दुर्योग** पु० दुष्टो योगः प्रा०स०। १दुर्भाग्यसूचके ग्रहयोगभेदे २दुष्टकौशले च "दासीभूतास्मि दुर्योगात् सपत्न्याः पतगोत्तम!" भा० आ० २७अ० तस्या दास्ये च सर्पाणां यथा कौशलभेदः तथा तत्रैवाध्याये दृश्यः।

**दुर्योण** न० दुष्टा योनिः स्थानमस्य अर्श० अच् संज्ञात्वात् णत्वम्। संग्रामे "नि दुर्योण आवृणङ् मृध्रवाचः" ऋ०५।२९।१० "दुर्योणः संग्रामः" भा० [योधनीये।

**दुर्योध** पु०दुःखेन युध्यतेऽसौ दुर्+युध–कर्मणि खल्। दुःखेन

**दुर्योधन** पु० दुर्+युध–भाषायां युच्। १धृतराष्ट्रस्य ज्येष्ठे पुत्रे। "कलेरंशस्तु सञ्जज्ञे भुवि दुर्योधनो नृपः!। दुर्बुद्धिर्दुर्मतिश्चैव कुरूणामयशस्करः। जगतो यस्तु सर्वस्य विद्विष्टः कलिपूरुषः। यः सर्वां घातयामास पृथिवीं पृथिवीपते!। उद्दीपितं येन वैरं भूतान्तकरणं महत्" भा०आ०६७अ० "स जातमात्र एवाथ धृतराष्ट्रसुतो नृप!। रासभारावसदृशं रुराव च ननाद च। तं खराः प्रत्यभाषन्त गृध्रगोमायुवायसाः। वाताश्च प्रववुश्चापि दिग्दाहश्चाभवत्तदा। ततस्तु भीतवद्राजा धृतराष्ट्रोऽब्रवीदिदम्। समानीय बहून् विप्रान् भीष्मं विदुरमेव च। अन्यांश्च सुहृदो राजन्! कुरून् सर्वांस्तथैव च। युधिष्ठिरो राजपुत्रो ज्येष्ठोनः कुलवर्द्धनः। प्राप्तः स्वगुणतो राज्यं न तस्मिन् वाच्यमस्ति नः। अयन्त्वनन्तरस्तस्मादपि राजा भविष्यति। एतद्धि ब्रूत मे तथ्यं यदत्र भविता ध्रुवम्। वाक्यस्यैतस्य निधने दिक्षु सर्वासु भारत!। क्रव्यादाः प्राणदन् घोराः शिवाश्चाशिवशंसिनः। लक्षयित्वा निमित्तानि तानि घोराणि सर्वशः। तेऽब्रुवन् ब्राह्मणा राजन्! विदुरश्च महामतिः। यथेमानि निमित्तानि घोराणि मनुजाधिप!। उत्थितानि सुते जाते ज्येष्ठे तु पुरुषर्षभ!। व्यक्तं कुलान्तकरणो भवितैष सुतस्तव। तस्य शान्तिः परित्यागे गुप्तावपनयो महान्। शतमेकोनमप्यस्तु पुत्राणान्ते महीपते!। त्यजैनमेकं शान्तिञ्चेत् कुलस्येच्छसि भारत!। एकेन कुरु वै क्षेमं कुलस्य जगतस्तथा। त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्। स तथा